# 2023-24

***Time - 3 hours***

***Full Marks - 80***

*Answer **all units** as per instructions.*
*Figures in the right hand margin indicate marks.*
*Candidates are required to answer*
*in their own words as far as practicable.*

**UNITS - I & II**

1. नभोमण्डलात् अवतरत: नारदस्य शोभा वर्णनीया । [15

अथवा

''माघे सन्ति त्रयोगुणा:' – इत्युक्ते: याथार्थ्यमालोचयत ।

2. मातृभाषया आंगलोभाषया वा सप्रसङ्गं व्याख्या कार्या । [10

युगान्तकालप्रतिसंहृतात्मनो
जगन्ति यस्यां सविकासमासत् ।
तनौ ममुस्तत्र न कैटभद्विष
स्तपोधनाभ्यागमसम्भवा मुद: ।।

अथवा

चयत्विषामित्यवधारितं पुरा
ततः शरीरीति विभाविता कृतिम् ।
विभुर्विभक्तावयवं पुमानिति
क्रमादमुं नारद इत्यवोधि सः ।।

3. द्वयोः मातृभाषया आंगलोभाषया वा अनुवादं कुरु । [7½ × 2

(क) गतं तिरश्चीनमनूरूसारथेः
प्रसिद्धमूर्ध्वज्वलनं हविर्भुजः
पतत्यधो धामविसारि सर्वतः
किमेतदित्याकुलमीक्षितं जनैः ।।

(ख) निसर्गचित्रोज्ज्वलसूक्ष्मपक्ष्मणा
लसद्विसच्छेदसिताङ्गसङ्गिना ।
चकासतं चारूचमूरू चर्मणा
कुथेन नागेन्द्रमिवेन्द्र वाहनम् ।।

(ग) विधाय तस्या पचितिं प्रसेदुषः
प्रकामप्रीयत यज्वनां प्रियः ।
गहीतुमार्यानपरिचर्यया मुहु-
र्महानुभावा हि नितान्तमर्थिनः ।।

UNITS - III & IV

4. सुयोधनस्य आदर्श राज्यशासन पद्धतिं आलोचयत । [15





अथवा

पठितांशमनुसृत्य भारवेः काव्यशैलीं विशदयत ।

5. मातृभाषया आंगलोभाषया वा सप्रसङ्गं व्याख्या कार्या । [10

विशङ्कमानो भवतः पराभवं
नृपासनस्थोऽपि वनाधिवासिनः ।
दुरोदर छद्मजितां समीहते
नयेन जेतुं जगतीं सुयोधनः ।।

अथवा

भवादृशेषु प्रमदाजनोदितं
भवत्यधिक्षेप इवानुशासनम् ।
तथापि वक्तुं व्यवसाययन्ति माम्
निरस्तनारीसमया दुराधयः ।।

6. केषांचित् द्वयोः मातृभाषया आंगलोभाषया वा अनुवादं कुरुत । [7½ × 2

(क) असक्तमाराधयतो यथायथं
विभज्य भक्त्या समपक्षपातया ।
गुणानुरागादिव सख्यमीयिवान्
न वाधतेऽस्य त्रिगणः परस्परम् ।।

(ख) वसूनि वाञ्छन्न वशी न मन्युना
स्वधर्म इत्येव निवृत्तिकारणः ।
गुरूपदिष्टेन रिपौ सुतेऽपि वा
निहन्ति दण्डेन स धर्मविप्लवम् ।।

(ग) उदारकीर्तेरूदयं दयावतः
प्रशान्तवाधं दिशतोऽभिरक्षया ।
स्वयं प्रदुग्धेऽस्य गुणैरूपस्नुता
वसूपमानस्य वसूनि मेदिनी ।।